# Kshamashodashistotram

# ક્ષમાષોડશિસ્તોત્રમ્

## Document Information

Text title : Kshamashodashistotram

File name : kShamAShoDashistotram.itx

Category : misc

Location : doc_z_misc_general

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Ramanuja Stotramala

Latest update : November 23, 2019, July 5, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2021

*sanskritdocuments.org*

# ક્ષમાષોડશિસ્તોત્રમ્

શ્રીવેદવ્યાસભટ્ટાર્યપુત્રરત્નૈઃ શ્રીવેદાચાર્યભટ્ટૈરનુગૃહીતા

શ્રીરસ્તુ ।

શ્રીમતે હયગ્રીવાય નમઃ ।

શ્રીમતે રામાનુજાય નમઃ ॥

યશ્ચક્રે રઙ્ગિણસ્સ્તોત્રં ક્ષમાષોડશિનામકમ્ ।
વેદવ્યાસસ્ય તનયં વેદાચાર્યં તમાશ્રયે ॥

શ્રીરઙ્ગેશ! યયા કરોષિ જગતાં સૃષ્ટિપ્રતિષ્ઠાક્ષયાન્
  અત્રામુત્ર ચ ભોગમક્ષયસુખં મોક્ષં ચ તત્તત્તૃષામ્ ।
ત્વત્સ્વાતન્ત્ર્યમપોહ્ય કલ્પિતજગત્ક્ષેમાઽતિહૃદ્યા સ્વતઃ
  ક્ષાન્તિસ્તે કરુણાસખી વિજયતાં ક્ષેમાય સર્વાત્મનામ્ ॥ ૧॥

પાપાનાં પ્રથમોઽસ્મ્યહં ભવતિ ચેચ્છાસ્ત્રં પ્રમાણં પરં
  શ્રીરઙ્ગેશ ! ન વિદ્યતેઽત્ર વિશયસ્સન્ત્યેવ તે સાક્ષિણઃ ।
પૃષ્ટ્વા તાનધુના મયોદિતમિદં સત્યેન ગૃહ્યેત ચેત્
  સત્યં હ્યુક્તમિતિ ક્ષમસ્વ ભગવન્ સર્વં તદસ્મત્કૃતમ્ ॥ ૨॥

ત્વત્ક્ષાન્તિઃ ખલુ રઙ્ગરાજ ! મહતી તસ્યાઃ પુનસ્તોષણે
  પર્યાપ્તં ન સમસ્તચેતનકૃતં પાપં તતો મામકમ્ ।
લક્ષ્યં નેતિ ન મોક્તુમર્હસિ યતઃ કુત્રાપિ તુલ્યો મયા
  નાન્યસ્સિદ્ધ્યતિ પાપકૃત્ તદધુના લબ્ધં તુ નોપેક્ષ્યતામ્ ॥ ૩॥

પુણ્યં પાપમિતિ દ્વયં ખલુ તયોઃ પૂર્વેણ યત્સાધ્યતે
  તત્ત્વદ્વિસ્મૃતિકારકં તનુભૃતાં રઙ્ગેશ! સઞ્જાયતે ।
પાશ્ચાત્યસ્ય તુ યત્ફલં તદિહ તે દુઃખચ્છિદઃ સ્મારકં
  તેનાનેન કૃતં તદેવ શિશુનેત્યસ્મત્કૃતં ક્ષમ્યતામ્ ॥ ૪॥

પુણ્યં યત્તવ પૂજનં ભવતિ ચેત્ તત્કર્તુરિષ્ટે કૃતે

તત્સ્યાદ્રઙ્ગપતે! કૃતપ્રકૃતિકૃતં સર્વેઽપિ તત્કુર્વતે ।
પાપં ચેદપરાધ એવ ભવતસ્તત્કર્તૃસંરક્ષણે
ક્ષાન્તિસ્તે નિરુપાધિકા નિરુપમા લક્ષ્યેત તત્ ક્ષમ્યતામ્ ॥ ૫॥

ન દ્વિત્રાણિ કૃતાન્યનેન નિરયૈર્નાલં પુનઃ કલ્પિતૈઃ
પાપાનામિતિ મત્કૃતે તદધિકાન્ કર્તું પ્રવૃત્તે ત્વયિ ।
તેભ્યોઽપ્યભ્યધિકાનિ તાન્યહમપિ ક્ષુદ્રઃ કરોમિ ક્ષણાત્
તદ્યત્નસ્તવ નિષ્ફલઃ ખલુ ભવેત્ તત્તે ક્ષમૈવ ક્ષમા ॥ ૬॥

સમ્ભૂયાખિલપાતકૈર્બહુવિધં સ્વં સ્વં ફલં દીયતાં
સર્વં સહ્યમિદં મમ ત્વયિ હરે ! જાગ્રત્યપિ ત્રાતરિ ।
દુઃખાક્રાન્તમવેક્ષ્ય મામિહ જનો દુષ્ટાશયત્સ્વદ્ગુણાન્
ક્ષાન્ત્યાદીન્ પ્રતિ દુર્વચં યદિ વદેત્ સોઢું ન તચ્છક્યતે ॥ ૭॥

ક્ષાન્તિર્નામ વરો ગુણસ્તવ મહાગ્ચ્છ્રીરઙ્ગપૃથ્વીપતે!
સોઽયં સન્નપિ સાપરાધનિવહાભાવે ન વિદ્યોતતે ।
તસ્માન્નૈકવિધાપરાધકરણે નિષ્ઠાવતા નિત્યશઃ
પ્રાપ્નોત્યેષ મયા પ્રકાશમતુલં પ્રાપ્સ્યામ્યહં ચ પ્રથામ્ ॥ ૮॥

મત્પાપક્ષપણાય યોજયસિ ચેદ્ઘોરેણ દણ્ડેન માં
રઙ્ગાધીશ્વર! કેવલાઘકરણાદ્દુઃખં મમ સ્યાન્મહત્ ।
તદ્દ્રષ્ટુર્ભવતોઽપિ દુઃખમતુલં ઘોરં દયાલો! ભવેત્
તસ્માત્ તેઽપિ સુખાયમત્કૃતમિદં સર્વં ત્વયા ક્ષમ્યતામ્ ॥ ૯॥

દેવ ! ત્વાં શરણં પ્રપન્નમપિ માં દુઃખાન્યનન્યાશ્રયં
બાધન્તે યદિ સર્વપાપનિવહાત્ ત્વાં મોક્ષ- યિષ્યામ્યહમ્ ।
ઇત્યુક્તં તવ વાક્યમર્થવિધુરં જાયેત યદ્વા ભવાન્
તત્રાશક્ત ઇતિ પ્રથેત હિ તતો માં રક્ષતુ ત્વત્ક્ષમા ॥ ૧૦॥

ન ત્વં ક્ષામ્યસિ ચેદિદં મમ કૃતં નાસ્ત્યત્ર કાચિત્ક્ષતિઃ
પૂર્વં યત્સમભૂત્ તદેવ હિ પુનર્જાયેત તજ્જાયતામ્ ।
યદ્વા સ્યાદધિકં ચ સોઽપિ સુમહાન્ લાભોઽસ્તુ મે તાદૃશઃ
સ્વામિન્ ! દાસજનસ્તવાયમધિકં સ્વૈરેણ દૂરીભવેત્ ॥ ૧૧॥

સોઽહં ક્ષુદ્રતયા જુગુપ્સિતતમં દુષ્કર્મ નિત્યં સ્મરન્
કુર્વન્ કામમશુદ્ધરીતિરભવં શ્રીરઙ્ગપૃથ્વીપતે! ।
એતત્તે મહતો વિશુદ્ધમનસા સ્મર્તું ન યુક્તં ખલુ ક્ષાન્ત્યા

વિસ્મર તત્તતોઽહમસુખાન્મુક્તો ભવેયં સુખી ॥ ૧૨॥

તત્તત્કર્મફલાનુરૂપમખિલો લોકસ્ત્વયા સૃજ્યતે
તસ્માત્કર્મવશંવદત્વમધિકં વક્તું તવાપિ ક્ષમમ્ ।
શ્રીરઙ્ગેશ્વર ! તત્પ્રશાન્તિવિધયે ક્ષાન્ત્યા નિરાકૃત્ય મે
સર્વં પાતકમાશુ દર્શય ભવત્સ્વાતન્ત્ર્યમત્યદ્ભુતમ્ ॥ ૧૩॥

શ્રીરઙ્ગેશ ! વચો મદીયમધુના વ્યક્તં ત્વયા શ્રૂયતાં
પુણ્યં તત્ફલસઙ્ગમાત્રવિરહાદ્ભૂયો ન માં પ્રાપ્નુયાત્ ।
પાપં નૈવ તથા ફલં વિતનુતે શક્યં ન તદ્વારણં
તત્ક્ષાન્ત્યા તવ શક્યમેવ તદિયં સદ્યસ્ત્વયા કલ્પ્યતામ્ ॥ ૧૪॥

શ્રીરઙ્ગેશ્વર! પુણ્યપાપફલયોઃ સ્વાધીનતાં કુર્વતોઃ
સર્વેષાં સુખદુઃખયોઃ સ્વયમહં મગ્નાશયો મામપિ ।
સ્મર્તું ન પ્રભવામિ કિં પુનરહો ત્વામન્તરન્તઃ સ્થિતં
તત્તે ત્વં ક્ષમયા નિરસ્ય કુરુ મે ત્વદ્ધ્યાનયોગ્યાં દશામ્ ॥ ૧૫॥

અલ્પં ચેદનવેક્ષણીયસરણાવારોપ્યતાં મત્કૃતં
કિઞ્ચિદ્ભૂરિ ભવેદિદં યદિ ગુરૂન્ સંપ્રેક્ષ્ય મે ત્યજ્યતામ્ ।
યદ્વાઽનન્તમનન્તવૈભવજુષો રઙ્ગક્ષમાવલ્લભ!
ત્વત્ક્ષાન્ત્યાઃ ખલુ લક્ષ્યતામનુગુણા- માનીયતાં તત્ત્વયા ॥ ૧૬॥

સન્ત્યક્તસર્વવિહિતક્રિયમર્થકામ-
શ્રદ્ધાલુમન્વહમનુષ્ઠિતનિન્દ્યકૃત્યમ્ ।
અત્યન્તનાસ્તિકમનાત્મગુણોપપન્નં
માં રઙ્ગરાજ! પરયા કૃપયા ક્ષમસ્વ ॥ ૧૭॥

શ્રીમાન્ કૂરાન્વવાયે કલશજલનિધૌ કૌસ્તુભાભોઽવતીર્ણઃ
શ્રીવેદવ્યાસભટ્ટારકતનયવરો રઙ્ગરાજસ્ય હૃદ્યઃ ।
વેદાચાર્યાગ્ર્યનામા વિદિતગુણગણો રઙ્ગિણઃ સ્તોત્રમેતત્
ચક્રે નિત્યાભિજપ્યંસકલતનુભૃતાં સર્વપાપાપનુત્ત્યૈ ॥ ૧૮॥

ઇતિ ક્ષમાષોડશીસ્તોત્રં સમાપ્તમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Kshamashodashistotram*

pdf was typeset on July 5, 2021

Please send corrections to *sanskrit@cheerful.com*